अट्टालसुंदराष्टकं

अट्टालसुंदराष्टकं

विक्रमपांड्य उवाच-
कल्याणाचलकोदंडकांतदोर्दंडमंडितं |
कबळीकृतसंसारं कलयेऽट्टालसुंदरं || 1 ||

कालकूटप्रभाजालकळंकीकृतकंधरं |
कलाधरं कलामौळिं कलयेऽट्टालसुंदरं || 2 ||

कालकालं कळातीतं कलावंतं च निष्कळं |
कमलापतिसंस्तुत्यं कलयेऽट्टालसुंदरं || 3 ||

कांतार्धं कमनीयांगं करुणामृतसागरं |
कलिकल्मषदोषघ्नं कलयेऽट्टालसुंदरं || 4 ||

कदंबकाननाधीशं कांक्षितार्थसुरद्रुमं |
कामशासनमीशानं कलयेऽट्टालसुंदरं || 5 ||

सृष्टानि मायया येन ब्रह्मांडानि बहूनि च |
रक्षितानि हतान्यंते कलयेऽट्टालसुंदरं || 6 ||

स्वभक्तजनसंतापपापापद्भंगतत्परं |
कारणं सर्वजगतां कलयेऽट्टालसुंदरं || 7 ||

कुलशेखरवंशोत्थभूपानां कुलदैवतं |
परिपूर्णं चिदानंदं कलयेऽट्टालसुंदरं || 8 ||

अट्टालवीरश्रीशंभोरष्टकं वरमिष्टदं |
पठतां शृण्वतां सद्यस्तनोतु परमां श्रियं || 9 ||

इति श्रीहालास्यमाहात्म्ये विक्रमपांड्यकृतं अट्टालसुंदराष्टकं |